# Shri Surakanda DevI Stava

# શ્રીસુરકન્દાદેવીસ્તવઃ

## Document Information

Text title : Surakanda Devi Stava

File name : surakandAdevIstavaH.itx

Category : devii, varadAnanda, pArvatI

Location : doc_devii

Author : Swami Varadananda Bharati (Pracharya A. D. AThavale)

Transliterated by : Arun Parlikar

Proofread by : Arun Parlikar

Description/comments : bhAvArchanA

Acknowledge-Permission: Shri Dasganu Maharaj Pratishthan, Gorte https://www.santkavidasganu.org

Latest update : June 3, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2023

*sanskritdocuments.org*

Shri Surakanda DevI Stava

# શ્રીસુરકન્દાદેવીસ્તવઃ

ॐ શ્રી

॥ શ્રીશઙ્કર ॥

(અનુષ્ટુપ્)

સુરાણાં મૂલભૂમિત્વાદ્ દેવાનાં વા સુખપ્રદમ્ ।
સુરકન્દેતિ વિખ્યાતં ક્ષેત્રં હિમવતઃ શુભમ્ ॥ ૧॥

તત્ર દેવી મહાદેવી પાર્વતી પરમેશ્વરી ।
રાજતે ભક્તત્રાણાય સુરકન્દનિવાસિની ॥ ૨॥

સર્વસૌખ્યપ્રદે માતઃ ચેતસઃ સમ્પ્રસાદિની ।
પાહિ માં સર્વતો ભદ્રે સુરકન્દનિવાસિની ॥ ૩॥

સાન્નિધ્યાત્ તવ રુદ્રાણિ સર્વોપરિ વિરાજતે ।
ઉન્નત્યનુભવાત્ ભક્તો હૃદિ સન્તુષ્યતે પરમ્ ॥ ૪॥

ત્વં તુ સાક્ષાત્ મહામાયા અવાઙ્મનસગોચરા ।
પ્રસાદાત્ તવ કલ્યાણં સુરકન્દનિવાસિની ॥ ૫॥

ત્વં ચન્દ્રવદની કુબ્જા રેણુકા ભુવનેશ્વરી ।
વારાહી બગલા કાલી ચામુણ્ડા છિન્નમસ્તકા ॥ ૬॥

ક્વચિત્ કાર્યનિમિત્તેન ભક્તભાવનયા ક્વચિત્ ।
વા શક્તિપીઠરૂપેણ હ્યત્ર તત્ર વિરાજસે ॥ ૭॥

ક્રૂરા દુષ્ટવિનાશાય ભક્તાનાં કરુણામયી ।
પ્રોદ્યતાયુધસમ્ભારા વત્સલા વરદાયિની ॥ ૮॥

શારદારૂપમાસ્થાય જ્ઞાનવિદ્યા પ્રવર્ધિની ।
લક્ષ્મીઃ ત્વં ભવસિ પ્રેષ્ઠા સુખૈશ્વર્યસમન્વિતા ॥ ૯॥

વિદ્વાન્ બુદ્ધ્યનુસારેણ ત્વામમ્બ મનુતે બહુ ।

ચિત્શક્તિં પ્રકૃતિં માયાં જગદમ્બાં પરાં શિવામ્ ॥ ૧૦॥

શક્તિબુદ્ધિસ્વરૂપેણ સર્વભૂતેષુ તિષ્ઠસિ ।
ભક્તિયુક્તિપ્રસાદૈશ્ચ મચ્ચિત્તં સમલઙ્કુરુ ॥ ૧૧॥

માં દુર્ગે ભવસમ્મોહાત્ શીઘ્રં મોચય મોચય ।
સન્તૃપ્તોઽસ્મિ કૃતાર્થોઽસ્મિ કર્તવ્યં નાવશેષિતમ્ ॥ ૧૨॥

ગઙ્ગાતીરે દેહયાત્રાં સમાપ્તિં યાતુ નીરુજા ।
એતાવતી મમાકાઙ્ક્ષા સુરકન્દનિવાસિની ॥ ૧૩॥

અદીનાં નીરુજાં યાચે સંન્યાસે પરિપૂર્ણતામ્ ।
ગઙ્ગાતીરે દેહયાત્રાં સુરકન્દનિવાસિની ॥ ૧૪॥

સર્વે નિરામયાઃ પ્રાપ્તા સ્વં સ્વં ગેહં સુરેશ્વરી ।
ગિરિજે ત્વત્કૃપાયોગાત્ પ્રતિકૂલ-પરિસ્થિતૌ ॥ ૧૫॥

પૂરિતા તવ વાત્સલ્યાત્ શિશોર્મમ મનોરથાઃ ।
લબ્ધો મે પરમાહ્લાદઃ ત્વત્પ્રસાદાત્ શુભા મતિઃ ॥ ૧૬॥

નમસ્કરોતિ ભૂયઃ ત્વાં અનન્તો બાલકઃ સ્તવ ।
પાહિ માં પાહિ માં નિત્યં સુરકન્દનિવાસિની ॥ ૧૭॥

ઇતિ સ્વામી વરદાનન્દભારતીવિરચિતઃ શ્રીસુરકન્દાદેવીસ્તવઃ સમ્પૂર્ણઃ ।

ભાવાર્ચના (પ્રાચાર્ય અ. દા. આઠવલે)

https://www.santkavidasganu.org, https://www.youtube.com/@varad-vani1496

Encoded and proofread by Arun Parlikar

*Shri Surakanda DevI Stava*
pdf was typeset on June 4, 2023

Please send corrections to *sanskrit@cheerful.com*